International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 102-104
© 2026 IJMH
www.themultijournal.com
Received: 18-05-2026
Accepted: 10-06-2026
Publish : 11-06-2026

**अनिलकुमारशुक्लः**
शोधच्छात्रः, साहित्यविभागः,
गंगानाथझापरिसरः, प्रयागराजः

**Correspondence:**
**अनिलकुमारशुक्लः**
शोधच्छात्रः, साहित्यविभागः,
गंगानाथझापरिसरः, प्रयागराजः

# परिहासविजल्पिते ध्वनिविमर्शः

**अनिलकुमारशुक्लः**

संस्कृतकाव्यशास्त्रे ध्वनेः सिद्धान्तरूपे प्रतिष्ठा आचार्यानन्दवर्धनस्य मौलिकचिन्तस्य प्रतिफलमस्ति । आचार्यादस्मात्पूर्वमपि भामह-दण्डी-वामनोद्भटादिभिराचार्यैरलङ्कारगुणरीत्यादिकाव्यतत्त्वमाध्यमेन काव्ये चमत्कारोद्घाटनस्य प्रयासः कृतः । आनन्दवर्धनो ध्वनिना काव्यसौन्दर्यस्यात्मपरकां व्याख्यां प्रकट्य परवर्तिकाव्यार्थं कवीनामर्थञ्च नितान्तनूतनदिशोऽन्वेषणं कृतवान् ।

**व्युत्पत्ति - ध्वनति इति ध्वनिः** अर्थात् व्यङ्ग्यार्थस्य प्रतिपादनं ध्वनिरुच्यते ।

**ध्वन्यन्ते आभ्यामिति ध्वनिः** अर्थात् वाच्यः स्वस्वरूपं वाचकशब्दश्च स्वार्थं गौणं कृत्वा व्यङ्ग्यार्थस्याभिव्यक्तिं कुर्वतः तं काव्यविशेषं ध्वनिरुच्यते ।

**ध्वन्यते अनया इति ध्वनिः** अर्थात् व्यञ्जना ध्वनिरस्ति ।

**ध्वन्यते इति ध्वनिः** अर्थात् अर्थात् व्यञ्जनावृत्तिर्ध्वनिरस्ति ।

**ध्वननं ध्वनिः** अर्थात् व्यञ्जनामार्गो ध्वनिरस्ति ।

लोचनकारेण आनन्दवर्धनस्यास्य निम्नवाक्यस्याधारेण ध्वनेः पञ्च अर्थाः प्रतिपादिताः'[1]-

१. ध्वन्यते इति ध्वनिः - वाचकशब्दः
२. ध्वन्यते अनेन इति ध्वनिः - वाच्यार्थः
३. ध्वन्यते अनया इति ध्वनिः - व्यञ्जना
४. ध्वन्यते असौ इति ध्वनिः - काव्यविशेषे
५. ध्वन्यते अस्मिन् इति ध्वनिः - व्यङ्ग्यप्रधानकाव्ये ।

लोचनकारस्य मतानुसारं ध्वनिकारिकया प्रामुख्येन वाच्यव्यङ्ग्यार्थवाचकशब्दव्यञ्जनासमूह एव काव्यरूपत्वात् ध्वनिरस्ति । व्यङ्ग्यप्रधानकाव्ये व्यङ्ग्यार्थं प्रति अन्वयव्यतिरेकभावेन स्थितः शब्दो ध्वनिरुच्यते । अत्र चारुत्वं हुतुर्भवति । यथोक्तम् -

**उवत्यन्तरेणाशक्यं यच्चारुत्वं प्रकाशयन् ।**
**शब्दो व्यञ्जकता विभ्रद् ध्वनियुक्तविषयी भवेत् ।**[2]

अन्यच्च - **ध्वन्युवतेर्विषयी मवेदिति - ध्वनिशब्देनोच्यत इत्यर्थः** ।[3] सङ्क्षेपे तु वाचकशब्दार्थमपि ध्वनिपदस्य प्रयोगे कोऽपि विरोधो न भवति ।

आदिकाव्ये वाल्मीकिरामायणे ध्वनिप्रयोगोऽभिव्यञ्जितो भवति । यथा -

**मा निषादः प्रतिष्ठां त्वमगमः शाश्वती समाः ।**
**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥**

श्लोके अस्मिन् शोकस्थायीभावस्य व्यङ्ग्यत्वात् करुणरसो विद्यते । आनन्दवर्धनो वदति यदत्र कवेः शोकः श्लोकोऽभवत् ।[4] अयं शोकजन्यः प्रतीयमानरस एव काव्यात्मा अस्ति। अस्य श्लोकस्यार्थौ द्वौ स्तः - वाच्यार्थः, व्यङ्ग्यार्थश्च ।

**वाच्यार्थः-** भो निषाद ! आसंवत्सरं त्वं प्रतिष्ठां मा गमः हि कौञ्चमिथुनादेकस्य काममोहितस्य वधः तेन कृतः ।

**व्यङ्ग्यार्थः -** भो श्रीनिवासविष्णुरूपः रामः ! राक्षसमिथुनाद् एकं काममोहितं सीताहरणकर्तारं रावणं तेन हतः, अतः त्वमासंवत्सरं (सर्वदा) जगति प्रतिष्ठां गमः।

आचार्यस्य आनन्दवर्धनस्य मतानुसारं ध्वनिरेव काव्यस्य आत्मा अन्यानि च समस्तकाव्यतत्त्वानि ध्वनेरङ्गानि सन्ति । स्वरचिते ग्रन्थे ध्वन्यालोके ध्वनिविवेचने आचार्येण सर्वपक्षानामुपस्थानं सम्यग्रीत्या कृतम् । यत्र वाच्यः स्वस्वरूपं वाचकशब्दश्च स्वार्थं गौणं कृत्वा व्यङ्ग्यार्थस्याभिव्यक्तिं कुर्वतः तं काव्यविशेषं ध्वनिरुच्यते । ध्वनिकारमते - काव्यविशेषाङ्गी ध्वनिरिति कथितः।

**वाच्यार्थः -** ध्वनिकारस्य वाच्यार्थसन्दर्भे एका कारिका वर्त्तते -

**योऽर्थः सहृदश्लाघ्यः काव्यात्मेति व्यवस्थितः ।**
**वाच्यप्रतीयमानाख्यौ तस्य भदावुभौ स्मृतौ ॥**[5]

आनन्दवर्धनानुसारं गुणीभूतव्यङ्ग्यस्यापि सहृदयैः लक्षणीयं ध्वनि-निस्पन्दरूपञ्च भवति।[6] ध्वनिकारो वदति यत् सहृदयकारिकाव्यस्य एतादृशः कोऽपि प्रकारो न भवति यत्र व्यङ्ग्यार्थस्य स्पर्शं विना किमपि सौभाग्यं भवेत् ।[7]

**व्यङ्ग्यार्थः -** ध्वनिलक्षणे 'तमर्थम्' पदं व्यङ्ग्यमेव सूचयति। वाच्यार्थवाचकशब्दयोर्मेलनेन व्यङ्ग्यार्थस्य प्रतीतिर्भवति। काव्य-मिदं वाच्यार्थभिन्नः सहृदयेषु झटिति एव अवभासितं भवति ।[8]

**व्यञ्जकार्थः -** ध्वनिकाराचार्योऽर्थस्य व्यञ्जकतामपि स्वीकरोति । शब्दस्य व्यञ्जकत्वे सति अर्थस्यापि व्यञ्जकत्वं स्वीकार्यं वर्त्तते आचार्यमते ।[9] व्यङ्ग्यार्थस्य प्रकाशकानां व्यञ्जकार्थानां सन्दर्भे ध्वनिकारो वदति –

**अर्थशक्त्युद्भवस्त्वन्योः यत्रार्थः स प्रकाशते ।**
**यस्तात्पर्येण वस्त्वन्यद्व्यनक्युक्तिं विना स्वतः ।**[10]

**परिहासविजल्पिते ध्वनिविमर्शः-** परिहासविजल्पितग्रन्थे आचार्येण वाचक-व्यञ्जक-व्यङ्ग्यध्वनिभेदामुल्लेखः कृतः। तत्र संगृह्य प्रस्थि-तस्तदा इति परिहासानुसारं कस्मिंश्चित् मन्दिरे कश्चित् कथावाचकः पण्डितः आध्यात्मिकभावेन युक्तः सन् तत्र उपस्थितान् जनान् सम्बोधयन् अवदत् यत्"अहो! अस्मात् नश्वरात् संसारात् कोऽपि मनुष्यः किमपि वस्तुजातं धनं वा सह नीत्वा न गमिष्यति, एतत् ध्रुवं (सत्यं) अस्ति। तस्माद् हेतोः एव क्षणभङ्गुराणां सर्वेषां भौतिकानां वस्तूनां सङ्ग्रहः कस्यापि कृते सुखदायकः न भवति।" इति एवम् उपदेशं दत्त्वा सः पण्डितः ततः परं भक्तैः समर्पितानि विविधानि वस्त्राणि वस्तूनि च सर्वाणि आलस्यं विना आदरेण सङ्गृहीतवान्। तत्पश्चात् सः तानि सर्वाणि वस्तूनि स्वीकृत्य तस्मात् मन्दिरात् स्वगृहं प्रति प्रस्थितवान्। यथाह -

**कथानां वाचकः कश्चित् पण्डितो मन्दिरे क्वचित्।**
**जनान् सम्बोधयंस्तत्राऽध्यात्मभाव-समन्वितः ।।**
**प्रोवाच यत् न कोऽप्यस्मात् संसारात् नश्वरादहो!।**
**न किञ्चिद् वस्तुजातं वै नीत्वा प्रस्थास्यते ध्रुवम्।।**
**तस्मादेव हि सर्वेषां क्षणभङ्गुरवर्त्तिनाम्।**
**भौतिकानां न वस्तूनां संग्रहः सुखदो मतः ।।**
**उपदेशमिमं तत्र दत्त्वा स पण्डितस्ततः।**
**भक्तैर्दत्तानि वस्त्राणि वस्तूनि विविधानि च ।।**
**सर्वाणि तानि संगृह्य मुहुर्मुहुरतन्द्रितः ।**
**मन्दिराद् अथ तस्मात्तु प्रतस्थे स्वगृहं प्रति ।।** [11]

अस्मिन् पद्ये पण्डितस्य विचारभेदस्य विवेचनमस्ति । संसारेऽस्मि-न् सर्वं अत्रैव निवसति मृत्युकाले मानवेन सह किमपि न गच्छतीति व्यङ्ग्यध्वनिबेदेनोक्तं कविना ग्रन्थेऽस्मिन् परिहासविजल्पिते। पण्डितः जनान् उपदिशति यत् भौतिकवस्तूनि नश्वराणि सन्ति, अतः सङ्ग्रहः न करणीयः। किन्तु उपदेशसमाप्तौ सः स्वयमेव भक्तैः दत्तानि सर्वाणि वस्त्राणि वस्तूनि च सहर्षं सङ्गृह्य गृहं नयति।

तत्र ग्रन्थे पलाण्डूनां महार्घता इति परिहासे उक्तं यद् एकदा देवदत्तस्य श्वश्रूः मेलनाय उत्सुका सती स्वपुत्रीं देवदत्तं च दूरभाषं कृत्वा अवदत् यत् "हे सुते! अहम् श्वः युष्माकं गृहे आगच्छामि। अहं सर्वान् द्रष्टुं अतीव उत्साहिता अस्मि तथा च बहुभिः उपहारैः सह आगच्छामि। अहं सर्वेभ्यः नवीन-वस्त्राणि, मधुर-अन्नानि, विविधानि फलानि, बालेभ्यः च नूतन-क्रीडनकानि (खिलौने) आनयामि। हे सुते! यदि एतद् अतिरिच्य अन्यत् किमपि वस्तु युष्मदर्थम् आवश्यकम् अस्ति, तर्हि संकोचं विना कृपया स्पष्टं वदतु।" श्वश्र्वाः एतादृशं वचनं श्रुत्वा जामाता देवदत्तः स्वयमेव मध्ये उक्त्वा ब्रवीति यत् "अम्ब! कृपया पञ्चकिलो-परिमितं पलाण्डुं आनयतु।" यथाह -

**एकदा देवदत्तस्य श्वश्रूः सम्मेलनोत्सुका।**
**स्वपुत्रीं देवदत्तं च दूरभाषं करोति यत्।।**
**युष्मद्गृहे समायामि श्वस्तने दिवसे सुताः!।**
**सर्वान् द्रष्टुं समुत्साह उपहारैः समावृता ।।**
**सर्वेभ्यो नववस्त्राणि निष्ठान्नानि तथैव च ।**
**नानाफलानि बालेभ्यो नव-क्रीडनकानि च।।**
**यदि चाऽन्यत् किमप्यत्र युष्मदर्थमपेक्षितम् ।**
**कृपया सुस्पष्टतो वाच्यं संकोचेन विना सुते ! ।।**
**श्वश्वास्तद् वचनं श्रुत्वा देवदत्तो ब्रवीति यत्।**
**पलाण्डुं कृपया पञ्च किलोपर्यन्तम् आनयेत् ।।**[12]

पद्येऽस्मिन् व्यङ्ग्यभावो विद्यते । श्वश्रूः अतीव भावुकतापूर्वकं स्नेहवशात् स्वपुत्रीं बहुमूल्यानि वस्त्राणि, आभूषणानि, क्रीडनकानि च याचितुं कथयति। किन्तु व्यावहारिकः अथवा महर्घतया पीड़ितः जामाता देवदत्तः सर्वं स्नेहं विस्मृत्य गृहस्य मुख्यं महार्घं वस्तु 'पलाण्डुं' एव याचितवान्। अत्र वर्तमाने महार्घताकारणात् जनाः कथं पीडियन्ते इति सर्वं अत्र व्यङ्ग्यभावेनोक्तम् ।

तत्र हृदयं सुदृढ मम इति परिहासे कथितं यद् एकदा विमानचालकस्य पदे नियुक्तये इच्छया देवदत्तः यदा साक्षात्काराय उपस्थितः अभवत्, तदा तत्र साक्षात्कर्त्ता तम् एवम् अपृच्छत् यत् "त्वं वद, तव हृदयं निर्बलं (दुर्बलं) तु नास्ति खलु?" देवदत्तः तदा तस्मिन् प्रश्ने उत्तरं ददन् अवदत् यत्— "हे महोदय! मम हृदयं किमपि दुर्बलं नास्ति, यतः एकस्मिन् एव वर्षे वारद्वयं मम हृदयाघातः अभवत्, तथापि अहं निरन्तरं जीवामि। इदानीं मम हृदयस्य दृढतायाः एतस्मात् अधिकं किं प्रमाणं भविष्यति?"

**विमानचालकस्याऽथ पदे नियुक्ति-काम्यया।**
**देवदत्तो यदा साक्षात्कारार्थं समुपस्थितः।।**
**साक्षात्कर्त्ता यदा तत्र प्रश्नमेवम् उवाच यत् ।**
**त्वदीयं हृदयं ब्रूहि निर्बलं तु न वर्त्तते ? ।।**
**देवदत्तस्तदा तत्र चोत्तरे निजगाद यत् ।**
**न हि मे हृदयं किञ्चिद् दुर्बलं नाऽस्ति भो ! यतः।।**
**एकस्मिन्नेव वर्षे तु वारद्वयमहो! मम ।**
**हृदाघातोऽभवत् किन्तु जीवामि सततं तथा।।**
**इतोऽधिकं प्रमाणं किं भविष्यति महोदय !।**
**हृदयस्य ममाऽप्यत्र दृढतायास्तु साम्प्रतम् ।।**[13]

अस्मिन् पद्ये लक्षणायुक्तो ध्वनिरस्ति । विमानचालकस्य पदस्य कृते उत्तमं स्वास्थ्यं दृढं च हृदयं आवश्यकं भवति। साक्षात्कारकर्ता देवदत्तस्य हृदयस्य साहसस्य परीक्षां कर्तुं पृच्छति। किन्तु देवदत्तः स्वस्य अस्वस्थतामेव स्वहृदयस्य 'दृढतायाः' प्रमाणं मत्वा गौरवपूर्वकं वदति, यत् श्रुत्वा कस्यापि हास्यं स्वाभाविकम् अस्ति।

तत्र षट्त्रिंशद्वर्षदेश्योऽहम् इति परिहासे उक्तं यदेकदा कश्चित् वृद्धः इव दृश्यमानः पुरुषः मम प्रतिवेशे निवासार्थं समागतः। स सदा प्रसन्नहृदयः, स्वस्थः, सोल्लासः च दृश्यते स्म। एकदा अहम् तं वृद्धम् अपृच्छं यत् "भवान् सर्वदा स्वस्थः, सुखी, हृष्टमानसः च दृश्यते। अतः मह्यं प्रतीयते यत् भवान् सुरापानं धूम्रपानं च परित्यज्य प्रतिदिनं व्यायामं करोति।" मम एतत् वचनं श्रुत्वा सः पुरुषः प्रत्युवाच यत् "अहं न किमपि व्यायामं करोमि, न च प्रातःभ्रमणं करोमि। अहं तु प्रतिदिनं पञ्च-पैकट-परिमितं सिगरेटं पिबामि, तथा च नित्यं रात्रौ शयनात् पूर्वं सुरामपि गृह्णामि।" तस्य एतादृशं वचनं श्रुत्वा अहम् अतीव आश्चर्यचकितः अभवम्। ततः परम् अहं तं वृद्धसदृशं पुरुषम् अपृच्छं यत् "भवतः आयुः कति वर्षं वर्तते?" मम प्रश्नस्य उत्तरं ददन् सः पुरुषः अवदत् यत् "मम आयुषः केवलं षट्त्रिंशत् वर्षाणि एव व्यतीतानि सन्ति।" यथा कथितम् -

**वृद्धः कश्चित् निवासार्थं प्रतिवेशे मैमकदा।**
**प्रसन्नहृदयः स्वस्थः सोल्लासः समुपागतः ।।**
**एकदा तम् अपृच्छं यत् भवान् स्वस्थः सुखी तथा।**
**सदा प्रसन्नतायुक्तो दृश्यते हृष्टमानसः ।।**
**अतः प्रतीयते मह्यं परित्यज्य सुरादिकम्।**
**धूमपानं च संत्यज्य व्यायामं कुरुते तथा ।।**
**वचनं मे समाकर्ण्य वृद्धः स प्रत्युवाच यत्।**
**नाऽहं करोमि व्यायामं न प्रातभ्रमणं तथा।।**
**पञ्च-पैकटपर्यन्तं सिगरेटं पिबाम्यहम्।**
**सुरां च शयनात् पूर्वं नित्यं गृह्णामि वै निशि।।**
**तस्य वाचं समाकर्ण्य त्वहमाश्चर्यसंयुतः ।**
**पप्रच्छ तमहं वृद्धं किम् आयुस्तस्य वर्त्तते ? ।।**
**मम प्रश्नस्य सन्दर्भ पुरुषः स ब्रवीति यत्।**
**षट्त्रिंशदेव वर्षाणि व्यतीतानि ममाऽऽयुषः ।।**[14]

अस्मिन् पद्ये सुन्दरः व्यङ्ग्यपूर्णः ध्वनिरस्ति कश्चित् 36 वर्षीयः युवा अत्यधिक-धूमपानेन सुरापानेन च अकालवृद्धः अभवत्। लेखकः तं वृद्धं मत्वा तस्य उत्तम-स्वास्थ्यस्य रहस्यं पृच्छति, परन्तु अन्ते तस्य वयः श्रुत्वा ज्ञायते यत् व्यसनानां कारणात् सः युवेक्षणेऽपि वृद्धः दृश्यते। व्यसनकारणात् सर्वं स्वास्थ्यं नाशमाप्नोतीति शिक्षाऽत्र निहिताऽस्ति ।

**निष्कर्षः -** निष्कर्षेण वक्तं शक्यते यदाचार्येण प्रशस्यमित्रशास्त्रिणा स्वस्मिन् 'परिहासविजल्पितम्' इति ग्रन्थे सर्वेष्वेव नवप्रकरणेषु ध्वनितत्त्वं प्रकटितम् । कुत्रचित्तु तद्ध्वनितत्त्वं हास्यरसे कुत्रचित्तु वीररसे कुत्रचित्तु शृङ्गारसेऽप्यस्ति । ध्वनिमाध्यमेन व्यङ्ग्यभावेन वा समाजे विद्यमानानामसामाजिक -तत्त्वानामुल्लेखः कृतः । समाजे निहितदोषाः कथं नाशं प्राप्नुवन्ति कथं च समाज उत्कृष्टो भविष्यतीति इति सन्देशः सहृदयेभ्य आचार्यः प्रेषितवान् ।

**सन्दर्भ ग्रन्थसूची -**

1. ध्वन्यालोकः
2. काव्यप्रकाशः,
3. लोचनटीका
4. परिहासविजल्पितम्

**पाद टिप्पणी**

1. वाच्यवाचकसम्मिश्रः सहब्दात्मकाव्यमिति व्यपदेशो व्यञ्जकत्वं साम्याद् ध्वनिरित्युक्तः' इत्यर्थ पञ्च अर्थाः सन्ति । लोचनटीका, पृ. सं. - 142
2. ध्वन्यालोकः, 1.15
3. ध्वन्यालोकः, 1.15 लोचनव्याख्या
4. लोचनटीका, पृष्ठसं - 88
5. ध्वन्यालोकः, 1.4
6. तदियं ध्वनिनिष्पन्दरूपो द्वितीयोऽपि महाकविविषयोऽति-स्मरणीयो लक्षणीयः सहृदयैः ।ध्वन्यालोकः, पृ. सं. - 505
7. सर्वदा नास्त्येव सहृदयहृदयहारिणः काव्यस्य स प्रकारो यत्र न प्रतीयमानार्थसंस्पर्शेन सौभाग्यम् ।ध्वन्यालोकः, पृ. सं. -506
8. तद्धतसचेतसां सोऽर्थो वाच्यार्थविमुखात्मनाम। बुद्धौ तत्त्वार्ध-वशिन्यां झटित्येवावभासते । ध्वन्यालोकः, 1.12
9. 'शब्दार्थयोर्द्वयोरपि व्यञ्जकत्वं प्रतिपादितं स्यात्'। लोचन-व्याख्या, पृ. सं. - 463
10. ध्वन्यालोकः, 2.22
11. परिहासविजल्पितम्, नवमं प्रकरणम्, विप्रकीर्णपरिहासाः, संगृह्य प्रस्थितस्तदा, श्लोकः 1-5, पृष्ठः - 250
12. परिहासविजल्पितम्, नवमं प्रकरणम्, विप्रकीर्णपरिहासाः, पलाण्डूनां महार्घता, श्लोकः 1-5, पृष्ठः - 236, 237
13. परिहासविजल्पितम्, नवमं प्रकरणम्, विप्रकीर्णपरिहासाः, हृदयं सुदृढ मम, श्लोकः 1-5, पृष्ठः - 228, 229
14. परिहासविजल्पितम्, नवमं प्रकरणम्, विप्रकीर्णपरिहासाः, षट्त्रिं-शद्वर्षदेश्योऽहम्, श्लोकः 1-7, पृष्ठः - 210, 211